শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ওং নমো ভগৱতে ৱাসুদেৱায

মহর্ষি ৱেদৱ্যাসপ্রণীতং শ্রীমদ্ভাগৱতমহাপুরাণম্

# ॥ দ্বিতীযস্কন্ধে দশমোঽধ্যাযঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ওং নমো ভগৱতে ৱাসুদেৱায

# শ্রীমদ্ভাগৱতমহাপুরাণম্

# ॥ দ্বিতীযস্কন্ধে দশমোঽধ্যাযঃ ॥

শ্রীশুক উৱাচ
অত্র সর্গো ৱিসর্গশ্চ স্থানং পোষণমূতযঃ।
মন্ৱন্তরেশানুকথা নিরোধো মুক্তিরাশ্রযঃ॥ **1** ॥

দশমস্য ৱিশুদ্ধ্যর্থং নৱানামিহ লক্ষণম্।
ৱর্ণযন্তি মহাত্মানঃ শ্রুতেনার্থেন চাঞ্জসা॥ **2** ॥

ভূতমাত্রেন্দ্রিযধিযাং জন্ম সর্গ উদাহৃতঃ।
ব্রহ্মণো গুণৱৈষম্যাদ্বিসর্গঃ পৌরুষঃ স্মৃতঃ॥ **3** ॥

স্থিতির্ৱৈকুণ্ঠৱিজযঃ পোষণং তদনুগ্রহঃ।
মন্ৱন্তরাণি সদ্ধর্ম ঊতযঃ কর্মৱাসনাঃ॥ **4** ॥

অৱতারানুচরিতং হরেশ্চাস্যানুৱর্তিনাম্।
সতামীশকথাঃ প্রোক্তা নানাখ্যানোপবৃংহিতাঃ॥ **5** ॥

নিরোধোঽস্যানুশযনমাত্মনঃ সহ শক্তিভিঃ।
মুক্তির্হিৎৱান্যথারূপং স্বরূপেণ ৱ্যৱস্থিতিঃ॥ **6** ॥

আভাসশ্চ নিরোধশ্চ যতশ্চাধ্যৱসীযতে।
স আশ্রযঃ পরং ব্রহ্ম পরমাত্মেতি শব্দ্যতে॥ **7** ॥

যোঽধ্যাত্মিকোঽযং পুরুষঃ সোঽসাৱেৱাধিদৈৱিকঃ।
যস্তত্রোভযৱিচ্ছেদঃ পুরুষো হ্যাধিভৌতিকঃ॥ **8**॥

একমেকতরাভাৱে যদা নোপলভামহে।
ত্রিতযং তত্র যো ৱেদ স আত্মা স্বাশ্রযাশ্রযঃ॥ **9**॥

পুরুষোঽণ্ডং ৱিনির্ভিদ্য যদাসৌ স ৱিনির্গতঃ।
আত্মনোঽযনমন্ৱিচ্ছন্নপোঽস্রাক্ষীচ্ছুচিঃ শুচীঃ॥ **10**॥

তাস্ৱৱাৎসীৎ স্বসৃষ্টাসু সহস্রপরিৱৎসরান্।
তেন নারাযণো নাম যদাপঃ পুরুষোদ্ভৱাঃ॥ **11**॥

দ্রৱ্যং কর্ম চ কালশ্চ স্বভাৱো জীৱ এৱ চ।
যদনুগ্রহতঃ সন্তি ন সন্তি যদুপেক্ষযা॥ **12**॥

একো নানাৎৱমন্ৱিচ্ছন্ যোগতল্পাৎ সমুত্থিতঃ।
ৱীর্যং হিরণ্মযং দেৱো মাযযা ৱ্যসৃজৎ ত্রিধা॥ **13**॥

অধিদৈৱমথাধ্যাত্মমধিভূতমিতি প্রভুঃ।
যথৈকং পৌরুষং ৱীর্যং ত্রিধাভিদ্যত তচ্ছৃণু॥ **14**॥

অন্তঃশরীর আকাশাৎ পুরুষস্য ৱিচেষ্টতঃ।
ওজঃ সহো বলং জজ্ঞে ততঃ প্রাণো মহানসুঃ॥ **15**॥

অনুপ্রাণন্তি যং প্রাণাঃ প্রাণন্তং সর্ৱজন্তুষু।
অপানন্তমপানন্তি নরদেৱমিৱানুগাঃ॥ **16**॥

প্রাণেন ক্ষিপতা ক্ষুৎ তৃডন্তরা জাযতে প্রভোঃ।
পিপাসতো জক্ষতশ্চ প্রাঙ্মুখং নিরভিদ্যত॥ **17**॥

মুখতস্তালু নির্ভিন্নং জিহ্ৱা তত্রোপজায়তে।
ততো নানারসো জজ্ঞে জিহ্ৱয়া যোঽধিগম্যতে॥ **18**॥

ৱিৱক্ষোর্মুখতো ভূম্নো ৱহ্নির্ৱাগ্ ৱ্যাহৃতং তয়োঃ।
জলে ৱৈ তস্য সুচিরং নিরোধঃ সমজায়ত॥ **19**॥

নাসিকে নিরভিদ্যেতাং দোধূয়তি নভস্ৱতি।
তত্র ৱায়ুর্গন্ধৱহো ঘ্রাণো নসি জিঘৃক্ষতঃ॥ **20**॥

যদাঽঽত্মনি নিরালোকমাত্মানং চ দিদৃক্ষতঃ।
নির্ভিন্নে হ্যক্ষিণী তস্য জ্যোতিশ্চক্ষুর্গুণগ্রহঃ॥ **21**॥

বোধ্যমানস্য ঋষিভিরাত্মনস্তজ্জিঘৃক্ষতঃ।
কর্ণৌ চ নিরভিদ্যেতাং দিশঃ শ্রোত্রং গুণগ্রহঃ॥ **22**॥

ৱস্তুনো মৃদুকাঠিন্যলঘুগুর্ৱোষ্ণশীততাম্।
জিঘৃক্ষতস্ত্ৱঙ্ নির্ভিন্না তস্যাং রোমমহীরুহাঃ।
তত্র চান্তর্বহির্ৱাতস্ত্ৱচা লব্ধগুণো ৱৃতঃ॥ **23**॥

হস্তৌ রুরুহতুস্তস্য নানাকর্মচিকীর্ষয়া।
তয়োস্তু বলমিন্দ্রশ্চ আদানমুভয়াশ্রয়ম্॥ **24**॥

গতিং জিগীষতঃ পাদৌ রুরুহাতেঽভিকামিকাম্।
পদ্ভ্যাং যজ্ঞঃ স্ৱয়ং হৱ্যং কর্মভিঃ ক্রিয়তে নৃভিঃ॥ **25**॥

নিরভিদ্যত শিশ্নো ৱৈ প্রজানন্দামৃতার্থিনঃ।
উপস্থ আসীৎ কামানাং প্রিয়ং তদুভয়াশ্রয়ম্॥ **26**॥

উৎসিসৃক্ষোর্ধাতুমলং নিরভিদ্যত ৱৈ গুদম্।
ততঃ পায়ুস্ততো মিত্র উৎসর্গ উভয়াশ্রয়ঃ॥ **27**॥

আসিসৃক্ষোঃ পুরঃ পুর্যা নাভিদ্বারমপানতঃ।
তত্রাপানস্ততো মৃত্যুঃ পৃথকত্বমুভযাশ্রযম্॥ **28**॥

আদিৎসোরন্নপানানামাসন্ কুক্ষ্যন্ত্রনাডযঃ।
নদ্যঃ সমুদ্রাশ্চ তযোস্তুষ্টিঃ পুষ্টিস্তদাশ্রযে॥ **29**॥

নিদিধ্যাসোরাত্মমাযাং হৃদযং নিরভিদ্যত।
ততো মনস্ততশ্চন্দ্রঃ সঙ্কল্পঃ কাম এৱ চ॥ **30**॥

ৎৱক্চর্মমাংসরুধিরমেদোমজ্জাস্থিধাতৱঃ।
ভূম্যপ্তেজোমযাঃ সপ্ত প্রাণো ৱ্যোমাম্বুৱাযুভিঃ॥ **31**॥

গুণাত্মকানীন্দ্রিযাণি ভূতাদিপ্রভৱা গুণাঃ।
মনঃ সর্ৱৱিকারাত্মা বুদ্ধির্ৱিজ্ঞানরূপিণী॥ **32**॥

এতদ্ভগৱতো রূপং স্থূলং তে ৱ্যাহৃতং মযা।
মহ্যাদিভিশ্চাৱরণৈরষ্টভির্বহিরাৱৃতম্॥ **33**॥

অতঃ পরং সূক্ষ্মতমমৱ্যক্তং নির্ৱিশেষণম্।
অনাদিমধ্যনিধনং নিত্যং ৱাঙ্মনসঃ পরম্॥ **34**॥

অমুনী ভগৱদ্রূপে মযা তে অনুৱর্ণিতে।
উভে অপি ন গৃহ্ণন্তি মাযাসৃষ্টে ৱিপশ্চিতঃ॥ **35**॥

স ৱাচ্যৱাচকতযা ভগৱান্ ব্রহ্মরূপধৃক্।
নামরূপক্রিযা ধত্তে সকর্মাকর্মকঃ পরঃ॥ **36**॥

প্রজাপতীন্মনূন্ দেৱানৃষীন্ পিতৃগণান্ পৃথক্।
সিদ্ধচারণগন্ধর্ৱান্ ৱিদ্যাধ্রাসুরগুহ্যকান্॥ **37**॥

কিন্নরাপ্সরসো নাগান্ সর্পান্ কিম্পুরুষোরগান্।
মাতৄরক্ষঃ পিশাচাংশ্চ প্রেতভূতৱিনাযকান্॥ **38**॥

কূষ্মাণ্ডোন্মাদৱেতালান্ যাতুধানান্ গ্রহানপি।
খগান্ মৃগান্ পশূন্ ৱৃক্ষান্ গিরীন্ নৃপ সরীসৃপান্॥ **39**॥

দ্বিৱিধাশ্চতুর্ৱিধা যেঽন্যে জলস্থলনভৌকসঃ।
কুশলাকুশলা মিশ্রাঃ কর্মণাং গতযস্ত্ৱিমাঃ॥ **40**॥

সত্ত্বং রজস্তম ইতি তিস্রঃ সুরনৃনারকাঃ।
তত্রাপ্যেকৈকশো রাজন্ ভিদ্যন্তে গতযস্ত্রিধা।
যদৈকৈকতরোঽন্যাভ্যাং স্বভাৱ উপহন্যতে॥ **41**॥

স এৱেদং জগদ্ধাতা ভগৱান্ ধর্মরূপধৃক্।
পুষ্ণাতি স্থাপযন্ ৱিশ্ৱং তির্যঙ্নরসুরাত্মভিঃ॥ **42**॥

ততঃ কালাগ্নিরুদ্রাত্মা যৎসৃষ্টমিদমাত্মনঃ।
সন্নিযচ্ছতি কালেন ঘনানীকমিৱানিলঃ॥ **43**॥

ইত্থম্ভাৱেন কথিতো ভগৱান্ ভগৱত্তমঃ।
নেত্থম্ভাৱেন হি পরং দ্রষ্টুমর্হন্তি সূরযঃ॥ **44**॥

নাস্য কর্মণি জন্মাদৌ পরস্যানুৱিধীযতে।
কর্তৃৎৱপ্রতিষেধার্থং মাযযাঽঽরোপিতং হি তৎ॥ **45**॥

অযং তু ব্রহ্মণঃ কল্পঃ সৱিকল্প উদাহৃতঃ।
ৱিধিঃ সাধারণো যত্র সর্গাঃ প্রাকৃতৱৈকৃতাঃ॥ **46**॥

পরিমাণং চ কালস্য কল্পলক্ষণৱিগ্রহম্।
যথা পুরস্তাদ্ব্যাখ্যাস্যে পাদ্মং কল্পমথো শৃণু॥ **47**॥

শৌনক উৱাচ
যদাহ নো ভৱান্ সূত ক্ষত্তা ভাগৱতোত্তমঃ।
চচার তীর্থানি ভুৱস্ত্যক্ত্বা বন্ধূন্ সুদুস্ত্যজান্॥ **48** ॥

কুত্র কৌষারৱেস্তস্য সংৱাদোঽধ্যাত্মসংশ্রিতঃ।
যদ্বা স ভগৱাংস্তস্মৈ পৃষ্টস্তত্ত্বমুৱাচ হ॥ **49** ॥

ব্রূহি নস্তদিদং সৌম্য ৱিদুরস্য ৱিচেষ্টিতম্।
বন্ধুত্যাগনিমিত্তং চ তথৈৱাগতৱান্ পুনঃ॥ **50** ॥

সূত উৱাচ
রাজ্ঞা পরীক্ষিতা পৃষ্টো যদৱোচন্মহামুনিঃ।
তদ্বোঽভিধাস্যে শৃণুত রাজ্ঞঃ প্রশ্নানুসারতঃ॥ **51** ॥

॥ ইতি শ্রীমদ্ভাগৱতে মহাপুরাণে ৱৈযাসক্যামষ্টাদশ
সাহস্র্যাং পারমহংস্যাং সংহিতাযাং দ্বিতীযস্কন্ধে
পুরুষসংস্থানুৱর্ণনং নাম দশমোঽধ্যাযঃ॥